अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।

तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २.२६ ॥

atha cainaṁ nityajātaṁ nityaṁ vā manyase mṛtam |
tathāpi tvaṁ mahābāho naivaṁ śocitumarhasi || 2.26||

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।

तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २.२७ ॥

jātasya hi dhruvo mṛtyurdhruvaṁ janma mṛtasya ca |
tasmādaparihārye'rthe na tvaṁ śocitumarhasi || 2.27||

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।

अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २.२८ ॥

avyaktādīni bhūtāni vyaktamadhyāni bhārata |
avyaktanidhanānyeva tatra kā paridevanā || 2.28||

आश्चर्यवत्पश्यति कश्चिदेनम् - आश्चर्यवद्वदति तथैव चान्यः।

आश्चर्यवच्चैनमन्यः शृणोति - श्रुत्वाऽप्येनं वेद न चैव कश्चित्॥ २.२९ ॥

āścaryavatpaśyati kaścidenam - āścaryavadvadati tathaiva cānyaḥ |

āścaryavaccainamanyaḥ śṛṇoti - śrutvā'pyenaṁ veda na caiva kaścit || 2.29||

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।

तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ २॥३० ॥

dehī nityamavadhyo'yaṁ dehe sarvasya bhārata |
tasmātsarvāṇi bhūtāni na tvaṁ śocitumarhasi || 2.30||